ललित-नारायण-मिथिला-विश्वविद्यालयः

कामेश्वरनगरम्, दरभङ्गा – ८४६००४

मानविकीसङ्कायान्तर्गतसंस्कृतविभागे

विद्यावारिधिः(Ph.D.) इत्युपाधये प्रस्तुत:शोधप्रारूपम्

विषयः – बुद्धचरित-ललितविस्तरयोःबुद्धस्य जीवनशैल्याः तुलनात्मकमाध्ययनम्

शोधनिर्देशकः **डॉ विजयमल बैठा**

सह-प्राध्यापकः, संस्कृत-विभागः

आर. सी. एस.कलेज्

मझौल्, बेगुसरायः

शोधार्थी-- **मनोज-वर्मनः**

PAT क्रमाङ्कः –E2218009

विभागीय-क्रमाङ्कः - **01**

बर्षः - 2021-2022

दूरभाष - 8597963140

8609797587

बुद्धचरित-ललितविस्तरयोःबुद्धस्य जीवनशैल्याः तुलनात्मकमाध्ययनम्

प्राक्कथनम् (Introduction of Research) :

बुद्धचरित-ललितविस्तरयोः ग्रन्थयोः प्रधानरूपेण भगवतः बुद्धस्य समग्रजीवनस्य शैली वर्णिता। 'बुद्धचरितम्' इति ग्रन्थः ५६३ खीष्टपूर्बाव्दे विरचितः। तस्मिन् काले ब्राह्मणधर्मस्य प्रतिप क्षीरूपेण य स्य धर्मस्य प्रचा र-प्रसारः प्रवर्ति तः स तु बौद्धधर्मः। अस्य आदिप्रवर्तकः गौत मबुद्धः। क्षत्रियः सः गौतमगोत्रेऽजायत। नव विंशतितमे बर्षे तस्य ज्ञानालोकं जनलोके प्रचारितम् अभवत्। बुद्धस्य तद्धर्मः बौद्धधर्म इत्युच्यते। महात्मा बुद्धः पञ्चचत्वारिंशद्वर्षेभ्यः धर्मोपदेशं प्रदत्तवान्। बुद्धेन आजीवनं पूर्व स्यां दिशि चम्पा रणतः (भागलपुरतः) साँन्थालपरग णापर्यन्तं, पश्चिमा यां दिशि कुरुक्षेत्र -(हरियाना) पर्यन्तं, उत्तर स्यां दिशि कपिलावस्तु पर्यन्तं तथा द क्षिणस्यां दिशि कौशाम्वी र्यन्तं परि भ्रमणं कृतवान्। तस्य गमनकाले विम्विसारः, अनाथपिण्डकः इतोऽपि मार्गदर्शकः, वर्षाकारः, कारिगरः इत्यादयोः वहवः मान वाः तेन सह भ्रमिताः। भगवतः बुद्धस्य प्रियशिष्यः आनन्दः आसीत्। सर्वत्र धर्मप्रचारात्परं नवसप्ततितमे वर्षे सः राजगृहं प्रत्यागच्छत्। बुद्धेन तस्य पृथिवीलोके अन्तिमदिवसम् वोधगम्यम् आसीत्। अशीतितमे वर्षे तथा ४८३ खिस्टपूर्वा ब्दे कुशीनाराग्रामे भगवता बुद्धेन निर्वा णं प्राप्तम्। दशावतारस्तोत्रे बुद्धः यज्ञनिदानकारि णः विष्णोः अवताररूपेण दृश्यते। यथा –

'निन्दसि-यज्ञविधेरहह श्रुतिजातं

सदयहृदयदर्शितपशुघातम्।

केशव। धृतबुद्धशरीर

जय जगदीश हरे।'

बुद्धः विष्णोः अवतारे नवमावतारः। तेन आसमुद्र-हिमाचले महामानवनाम्ना ज्ञायते। शंकराचार्येण दशावतारस्तोत्रे कलियुगस्य योगिराजं बुद्धं प्रति स्वश्रद्धा ज्ञापिता -- 'कलौ योगिनां चक्रवर्त्ती'। अध्यापकः इ. वि. कात्तयेल सेक्रेड वुक्स् अफ दि इस्ट पर्याये ८९ संख्यके खण्डे बुद्धचरितस्य इंरेजि अनुवादे भुमिकांशे अलिखत् – "It is an early Sanskrit poem, written in India on the legendary history of Buddha."

उद्देश्यम् (Objective of Research) :

भगवान् बुद्धः आदिसमाजसंस्काररूपेण तथा समाजस्य दुःखमोचनाय सर्वस्यां दिशि प्रचारं प्रसारं च कृतवान्। अद्यापि वहवः निदर्शनानि दृश्यन्ते। मम गवेषणायाः उद्देश्यं तु बुद्धचरित-ललितविस्तरयोः तुलनात्मकाध्यायनेन समाजस्य उपरि ग्रन्थयोः सामाजिकं तथा दार्शनिकं प्रभावम् अपि च बोधिसत्वस्य वाल्यदशायाः तुलनात्मकम् आलोचनम्। एतेभ्यो विषयेभ्यः प्राक् कानिचन कार्याणि न दृष्टानि, सामान्यतमेव अस्ति। अतः एतेषां त्रयाणां विषयाणां प्रस्फुटनमेव मम उद्देश्यम्।

गवेषणायाः क्षेत्रम् (Area of the Research) :

मम गवेषणायाः क्षेत्रम् अश्वघोषस्य बुद्धचरितं ललितविस्तरञ्चेति। अन्येषु येषु ग्रन्थेषु अयं विषयः आलोचितः तान् ग्रन्थान् अपि निरीक्षणं कृतम् मया।

शोध-प्रविधिः (Research Methodology) :

i) गवेषणापत्रे विवेचनात्मकः शोध-प्रविधेः प्रयोगं भविष्यति।

ii) गवेषणाकार्ये विवेचनात्मकः-अनुसन्धानात्मक-तुलनात्मकं शोधप्रविधेः व्यवहारं भविष्यति।

शोधकार्ये नबीनत्बम् – (Novelty of the existing Research Work) :

शास्त्रे पठितम् भगवान् बुद्धः बिष्णोः नवमावताररूपेण प्रसिद्धः। भारतीय-दर्शनसम्प्रदायेषु नास्तिकेषु बौद्धदर्शनम् पठितम्। अश्वघोषस्य बुद्धचरिते बुद्धस्य जीवनं वर्णितम्, ललितविस्तरे बुद्धस्य ललितक्रीडायाः समाजस्य मार्गदर्शनं बहुविधेषु कौशलेषु प्रतिविम्बितं; यथा सामाजिकचेतना, दार्शनिकबोधगम्यता केन प्रकारेण संस्थिता तदेव मम गवेषणायाः विषयः। विषयेऽस्मिन् बहुविधेषु कार्येषु एषः विषयः नवीन एव।

अध्याय-विभाजनम् (Tentative Chapterization) :

प्राक्कथनम्

प्रथम-अध्यायः – बुद्धचरितस्य विषयवर्णनम्

द्वितीय-अध्यायः – ललितविस्तरस्य विषयवर्णनम्

तृतीय-अध्यायः – बुद्धचरित-ललितविस्तरयोः तुलनात्मकाध्ययनम्

चतुर्थ-अध्यायः – ग्रन्थयोः सामाजिक-मूल्यांकनम्

पञ्चम-अध्यायः – ग्रन्थयोः राजनैतिक-मूल्यांकनम्

षष्ठाध्यायः – ग्रन्थयोः दार्शनिक-मूल्यांकनम्

सप्तम-अध्यायः – धार्मिक-मूल्यांकनम्

अष्टम-अध्यायः - निष्कर्षः

बुद्धचरितस्य पूर्वोत्तर-विश्लेषणम् (Prior Analysis of Buddhacharitam) :

अश्वघोषेण विरचितं बुद्धचरितम् इति ग्रन्थे महामानवस्य बुद्धस्य अपु र्वा जीवनशैली वर्णिता। सप्तदशसर्गे विभक्ते अस्मिन् ग्रन्थे बुद्धस्य जन्मनः प्रभृति बुद्धत्वलाभपर्यन्तं विवरणं प्रदत्तम्। प्रथमे सर्गे तथा भगवत्प्रसूतिः नामके सर्गे भगवतः बुद्धस्य जन्मवृत्तान्तं वर्णितम्। द्वितीये अन्तःपुरविहारनामकसर्गे बुद्धस्य उपनयनं, विद्याभ्यासः, परि णयः, पुत्रलाभ श्चते विषयाः वर्णिताः। तृतीये सर्गे तथा उद्यानविहारे मानवजीवनस्य वास्तविकसत्त्वा अवगता भगवता बुद्धेन – "हीनस्य मध्यस्य महात्मनो वा सर्वस्य लोके नियतो विनाशः"। ३/५९

चतुर्थे स्त्रीविघातननामकसर्गे सिद्धार्थस्य वैराग्यसाधनं स्त्रीमोहम् त्वं नाकृष्टम्। सः मन्यते- 'मरणं निश्चितम्। अनित्यं तु जगन्मत्वा नात्र मे रमते मनः'। पुनः उच्यते यथा –

"जरा व्याधिश्च मृत्युश्च यदि न स्यादिदं त्रयं।

ममापि हि मनोज्ञेषु विषयेषु रतिर्भवत्"॥

अभिनिष्क्रमणनामके पञ्चमे सर्गे शाक्यराजपुत्रस्य बोधिसत्त्वस्य गृहत्यागस्य वर्णनमस्ति। भार्गवमुनेः आश्रमे बोधिसत्त्वदर्शनात् परं सन्दक-कन्नुकयोःनिवर्तनम्। सप्तमे सर्गे सिद्धार्थस्य तपोवनप्रवेशः, तपोवनवासिनां आतिथेयताग्रह णम्, अन्तःपुरविलाप श्च विषयाः वर्णिताः अष्टमे सर्गे अतः कुमारसिद्धार्थान्वेष णं वर्णितं नवमे सर्ग, दशमे तु सिद्धार्थमवलोक्य

श्रेण्यभावप्रधानम्, एकादशे सर्गे सिद्धार्थः मगधपतिं अवदत् यत् अहं विषयभोगात् विरतोऽभवत्। सर्पवत् विषया द् विभेति सः। अराड़मुनेः दर्शनं द्वादशसर्गे वर्णितम्। त्रयोदशसर्गे मारवर्णनम्। चतुर्दशसर्गे बुद्धत्वप्राप्तिः। बुद्धत्वप्राप्तिरेव 'बुद्धचरितम्' इति ग्रन्थस्य समाप्त्यंशे वर्णितम्।

ललितविस्तरस्य विश्लेषणम् (Prior Analysis of Lalitvistara) :

ललितविस्तरः महायान बौद्धसम्प्रदायस्य अन्त गतम्। महायान बौद्धसम्प्रदायस्य वैपुल्यसूत्रस्य अन्तर्गतं ललितविस्तरम् इति। बुद्धस्य जीवन विषयात्मकः अयं ग्रन्थः । संसारेऽस्मिन् तथागतेन या ललितक्रीड़ा कृता तदे व ललितविस्तरः इति नाम्ना प्रसिद्धः। ललितविस्तरः सप्तविंशतिपरिवर्ते विभक्तः। अयं ग्रन्थः केनापि एकेन न विरचितः। कुत्रापि सम्यक्तया लेखकस्य उल्लेखं नास्ति। अतः बहुविदग्धजनैः पण्डितैः ग्रन्थोऽयं विरचितः।

बोधिसत्त्वस्य जन्मवृत्तान्ते वर्णितं यत् बोधिसत्त्वः क्षत्रियकुले जन्मग्रह णाय निश्चितोऽभवत्। भगवान् स्वयं प्रकाशनाय शाक्यकुल स्य शुद्धो दनपत्नीं मायादेवीं योग्यां मन्यते। बुद्धजन्म नः परं लु म्बिन्यां दुःखदारिद्र्यं दूरीभूतम्। बुद्धजन्म नः परं तेन पादाभ्यां स्वयमेव सप्तपाकपरिक्रम णं कृतम्। तेन उक्तम् – लोकसमाजे अन्तिमं जन्म स्वीकृतं मया, जरामरणादिविनाशं कर्तुम्।

सप्तमपरिवर्ते तथागतस्य जन्मवृत्तान्तं व र्णितम्। अष्टमपरिवर्ते बुद्धस्य देवालयगमनम्। नवमपरिवर्ते अलंकारस्य वर्णनम्। विद्यालयगमनं दशमपरिवर्ते, एकादशे तु स्वकीयसम्पत्ति - निरीक्षणम्। द्वादशे यशोधरया समम् विवाह बन्धनम्। त्रयोदशे संसारत्यागस्य चिन्तनम्, चतुर्दशे जराव्याधिवर्णनम्, पञ्चदशे गृहत्यागस्य वर्णनम्, षोडशे तु सत्यान्वेषनम्। सप्तदशे

तपस्या वर्णनम्, अष्टादशे सुजातया पा यसार्पणम्। ऊनविंशति-विंशतिपरिवर्ते बोधिमण्डः, एकविंशतिपरिवर्ते कामदेवेन कामवर्ष णम्। द्वाविंशतिपरिवर्ते बोधिसत्त्वस्य नवीनदर्मस्य उपदेशदानम्। चतुर्विंशति-पञ्चविंशतिपरिवर्ते भगव तः बुद्धस्य बौद्धर्मस्य उपदेशदानम्। षड्विंशतिपरिवर्ते पञ्चभिक्षुकं सद्धर्मस्य उपदेशदानस्य वर्णनम्, अ न्तिमे तु ग्रन्थस्य महिमा-वर्णनम्।

ग्रन्थयोः तुलनात्मक-अध्ययनम् (Comparative Study between Buddhacharita & Lalitavistara) :

बुद्धचरितम् ललितविस्तरश्चेति ग्रन्थद्वयं परन्तु उपजीव्य-विषयं तु भगवातः बुद्धस्य जीवनचरितमेव। ललितविस्तरे बुद्धस्य ललितक्रीड़ा वर्णिता। बुद्धचरितम् अश्वघोषेण कृतम्, किन्तु ललितविस्तरः केन विरचितः अस्य सम्यक् लिपिः न प्राप्ता। द्वयोः ग्रन्थयोः रचनाशैली, ग्रन्थयोः सादृश्य-वैसादृश्ये सामाजिकं राजनैतिकं चेति भेदान् दृश्यते, तान् पर्यालोचनम् इतोऽपि बुद्धस्य उपदेशं कथं वौद्धदर्शने रूपान्तरितं भवेत् – तद् गवेषणायाः मुख्यः विषयः।

बुद्धचरित-ललितविस्तरयोः ग्रन्थयोः सामाजिक-राजनैतिक-धार्मिकस्य विषयस्य उपरि तुलनात्मकाध्ययनम्।

सामाजिक मूल्याङ्कनम् –

साहित्यसमाजस्य दर्प णम्। समाजस्य वर्णनं तस्मिन् समये शा स्त्रेषु प्रतिविम्वित म् अर्थात् तस्मिन् समये व्यवहृतवेशभूषा -रीतिनीति-भोजनादीनां वर्णनं शास्त्रे प्राप्तम्।

ललितविस्तरसूत्रं तत्कालीन -समाजस्य प्रतीकस्वरूपम्। संसारे सर्वत्रैव विघ्नविप्लवाश्चेति विस्तीर्यन्ते तस्मिन् समये भगवतः बुद्धस्य आविर्भावः आनन्दस्वरूपः। बुद्धस्य क्रिया-कलाप-व्यवहाराद्य अवलोक्य सामाजिकजनाः वौद्धधर्मं गृहीतवन्तः।

बुद्धचरितम् इत्यत्रापि बुद्धः समाजस्य कल्या णाय जन्मग्रह णं कृतम्। बुद्धेन तस्य धर्मोपदेशेन समाजं दिशा प्रदर्शिता –

"देवैरभिप्रार्थमनल्पभोगं सार्धं तयासौ वुभुजे नृपालः।

सा चाथ विद्येव समाधियक्ता गर्भं दधे लोकहिताय साध्वी॥"

राजनैतिक मूल्याङ्कनम् –

बुद्धचरित-ललितविस्तरौ ग्रन्थौ मूलतः धर्मग्रन्थरूपे ण प्रतिपादितौ। यद्यपि तत्र नीतिशास्त्रविषयः नास्ति तथापि ग्रन्थयोः राजनीतिसम्वन्धि नं विचारविम र्शं दृ श्यते। पुरा आन्वीक्षिकी-त्रयी-वार्ता-दण्डानीतिश्चेति च तस् विद्या आस न्। राजतन्त्रे नृप ए व सर्वश्रेष्ठः। उक्तं च – 'अबलस्य बलं राजा।' ललितविस्तरे आह –

"उत्तिष्ठ विंजित संग्राम प्रजाकारा तिमिस्रे विवरलोके।

देशय त्वं मुने धर्मं अज्ञातारो भविष्यन्ति॥"

दार्शनिक-मूल्याङ्कनम् (Philosophical Analysis):

वस्तुतः बुद्धः दार्शनिकरूपेण न अजायत। परन्तु वास्तववादी (Positivistic) भावनायाः तं दार्शनिकम् इत्युच्यते। बुद्धेन दृष्टवान् दुःखमयं संसारोऽयम्। तस्य उन्मोचनं केनापि उपायेन करणीयं , अतः "चत्वारि आर्य सत्यानि" तेन कृतानि। श्रीमत्या Rhys

Davids अस्मिन् विषये उक्तम् "ill and the ending of ill". बौद्धदर्शने मूलतः निर्वाण-लाभस्य बहवः पन्थानः समुपस्थिताः। कारणं तु निर्वाणं परमं सुखम्

धार्मिक-मूल्याङ्कनम् (Religion Analysis)

महाभारते वयं दृष्टवन्तः एकदा सर्वे धर्मानुसरणम् अकुर्वन् -

"नैव राज्यं न राजासीन्न दण्डो न च दाण्डिकः ।

धर्मेनैव प्रजाः सर्वाः रक्षन्ति च परस्परम्"।।

तदा न कोऽपि राजा आसीत्, न तु राज्यम्। ललितविस्तरेऽपि दृष्टम् -

"अध्येषकोऽहं तव धर्मराज अध्याचरा कृत्वन सर्वदेवान्।

अनेन पुष्पेण अहमपिक्षिप्रं प्रवर्तपेयं वर धर्मचक्रम्।।४२

बुद्धचरितग्रन्थे बुद्धेन उक्तम् धर्मानुसरणं हि निर्वाण-प्राप्तेः एकमेव सन्मार्गम्। अतः तथैव आचरेत्।

निष्कर्ष (Conclusion):

जगत् दुःखमयं परन्तु निर्वाणं शान्तम्। ग्रन्थयोः बुद्धेन तस्य जीवनशैल्या च जनमानसस्य मनसि तस्य ईश्वररूपम् आविर्भूतम्। अतः तस्य ललितक्रीडाम् अपि च उपदेशो हि केवलं मुक्तेः अद्वितीयमेव सन्मार्गम्।

सन्दर्भ-ग्रन्थसूची (Bibliography) :

1. बुद्धचरितम् – महन्त श्रीरामचन्द्रदास शास्त्री – वाराणसी चौखम्वा, प्रथम संस्करण, २०१९ वि.
2. ललितविस्तर – शान्तिभिक्षुशास्त्री – उत्तरप्रदेश हिन्दीसंस्थान, प्रथम संस्करण १९८४
3. ललितविस्तर – परशुराम शर्मा
4. ललितविस्तर – एकं समीक्षात्मकम् अध्ययनम्, Dr. Ram bali
5. The Essence of Buddhism. Ed. P. Lakshmi Narasu. Madras : Srinivasa varadachari, 1907.
6. संस्कृत शोध-प्रविधि – प्रो. प्रभुनाथ द्विवेदी – वारानसी, शारदा संस्कृत संस्थान, द्वितीय संस्करन: २०१७
7. शोध-प्रविधि – डॉ विनयमोहन शर्मा – नेशनल पव्लिशिग हाउस, प्रथम संस्करण, १६७३
8. संस्कृतशोधप्रविधिः – डॉ सत्यनारायण आचार्य – ओड़िशा राष्ट्रिय संस्कृत संस्थान, प्रथम प्रकाशन २००५
9. गवेषणा प्रविधि – डा. सुवोधकुमारच्याटार्जी, विद्यापुरी-१९७९
10. अनुसन्धानस्य प्रविधिप्रक्रिया, डाँ. नगेन्द्र, रा. सं. संस्थान, निउ दिल्ली।
11. आचार्यबलदेभ-उपाध्यायस्य, भारतीय-दर्शनम्
12. डॉ श्रीकान्त पाण्डेय , भारतीय-दर्शनम्

13. E. J. Thomas – History of Buddhist thought

14. वाचस्पति गौरोला, भारतीय-दर्शनम्

15. S. N. Dasgupta – भारतीय दर्शन का इतिहास

16. A.B. Keith, Buddhist Philosophy.

17. नरेन्द्रदेव, बौद्ध धर्म एवं दर्शन

18. C.D. Sharma, Critical Survey of Indian Philosophy.

19. A. B. Keith, History of Sanskrit Literature.

20. वामन-अप्ते – शब्दकोष

21. हिन्दुसंस्कार – ले. राजबली पाण्डेय, चौखम्बा, विद्याभवन, वाराणसी

22. प्राचीन भारत का राजनैतिक और सांस्कृतिक इतिहास – राधाकृष्ण-चौधुरी, भारतीभवन-१९८९

23. अश्वघोषकृत सौन्दरानन्द